तृतीयभागः

अष्टमः पाठः

# ८. आयुर्वेदः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे के बाधाम् अनुभवन्ति?
२. तेषां कीदृशम् उपचारं कुर्वन्ति?
३. गृहे भवान् कदापि एतादृशम् औषधं स्वीकृतवान् वा?
४. गृहवैद्यं नाम किम्?

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

शरीरम् उष्णं भवति। नासिकातः जलं स्रवति। शिरोवेदना अपि भवति। तर्हि वयं किं कुर्मः? वैद्यस्य सकाशं गत्वा औषधं स्वीकुर्मः।

कलुषिताहारसेवनं, विलम्बेन शयनं, उत्तमदिनचर्यायाः अपालनमेव ज्वरस्य कारणमिति उक्त्वा रोगस्य औषधं दत्त्वा प्रेषयति वैद्यः।

उत्तमदिनचर्याम्, ऋतूनामनुगुणम् आहारादिसेवननियमान् च यः सम्यक् पालयति सः स्वस्थः भवति। एतेषां विवरणं भारतीयपुरातनवैद्यशास्त्रत्वेन विख्याते आयुर्वेदे उपलभ्यते। शरीरं, पञ्चेन्द्रियाणि, आत्मा इत्येतेषां संयोगः एव आयुः इति, आयुषः विषये विवरणात्मकं शास्त्रम् आयुर्वेदः इति आयुर्वेदस्य निर्वचनम्।

शल्य-शालाक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्य-अगदतन्त्र-रसायन-वाजीकरणानि आयुर्वेदस्य अष्टौ अङ्गानि। वैद्यशास्त्रस्य सम्पूर्णोऽपि विषयः द्विसहस्रवर्षेभ्यः पूर्वतः अस्मिन् शास्त्रे उपलभ्यते इत्यतः विश्वस्य प्रथमचिकित्साशास्त्रम् इति अस्य ख्यातिः। बहूनां वैदिकलौकिकविषयाणां चर्चा अत्र कृता इत्यतः एतत् शास्त्रं पञ्चमवेदत्वेनापि परिगण्यते।

स्वस्थस्य स्वास्थ्यरक्षणोपायाः, रुग्णस्य रोगशमनोपायाः अस्मिन् शास्त्रे सम्यग् विवृताः सन्ति।

चरकसंहिता, सुश्रुतसंहिता इति ग्रन्थौ आयुर्वेदस्य आदिमौ। चरकमुनिना प्रणीता चरकसंहिता विभिन्नरोगान्, रोगशमनोपायान्, औषधानां गुणान्, औषधसेवनक्रमं च विवृणोति। कर्णनासिकादीनां बाह्यावयवानां, हृदयकालेयादीनाम् आन्तरिकावयवानां शस्त्रचिकित्साक्रमं विवृणोति सुश्रुतसंहिता। अतः ग्रन्थद्वयमपि आयुर्वेदग्रन्थेषु मूर्धन्यस्थाने तिष्ठति।



SCERT TELANGANA

अष्टाङ्गहृदयं, शार्ङ्गधरसंहिता, भावप्रकाशः, माधवनिदानम् इत्यादयः बहवः प्रसिद्धाः आयुर्वेदग्रन्थाः संस्कृतभाषायाम् उपलभ्यन्ते।

आयुर्वेदः भारतीयानां नित्यजीवनस्य एकं प्रायोगिकं शास्त्रम्। तत्रत्यान् सर्वान् विषयान् भारतीयाः स्वीयजीवने अनुयन्ति। ततः वयं बहून् रोगनिवारणोपायान् शिक्षितवन्तः। उदाहरणार्थं वयम् आर्द्रकचायसेवनेन ज्वरं, तुलसीदलचर्वणेन कफं, ललाटे चन्दनलेपनेन शिरोवेदनाम्, कृष्णमरीचस्य सेवनेन कासं च निवारयामः। एवम् अस्माकं पूर्वजाः वैद्यस्य साहाय्यं विना प्राथमिकोपचारेण, औषधेन विना व्यवस्थितजीवनशैल्या च रोगनिवारणसमर्थाः अभवन्।

मनुष्यः कथं स्वस्थः भवति इति विषयम् आयुर्वेदः एकेनैव श्लोकेन सङ्क्षेपेण प्रतिपादयति। पश्यन्तु !

**श्लो -** **मितं भुक्त्वा शतं जप्त्वा भुक्त्वा शतपथैः गतैः।**
**वामभागे शयानस्य भिषग्भिः किं प्रयोजनम्?॥**

इत्थं भारतस्य प्राचीनवैद्यशास्त्रत्वेन विख्यातम् इदं शास्त्रम् अस्माभिः सर्वैः भारतीयैः आदरणीयम्, तत्रत्याः सर्वाः सूचनाः आचरणीयाश्च।



SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. प्राथमिकचिकित्सारूपेण किं किं कुर्मः?

आ. हरिद्रा किमर्थम् उपयुज्यते?

इ. अनारोग्ये सति अस्माकं ज्योष्ठाः किं कुर्वन्ति?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। अदृष्ट्वा कति पदानि वक्तुं शक्नुवन्तीति परस्परं पृच्छन्तु।

| | | | |
|---|---|---|---|
| हरिद्रा | आर्द्रकं | कृष्णमरीचः | प्राथमिकचिकित्सा |
| सम्प्रदायः | स्वस्थ्यरक्षणोपायः | शल्यम् | शालाक्यः |
| कायचिकित्सा | भूतविद्या | कौमारभृत्यम् | अगदतन्त्रम् |
| रसायनम् | वाजीकरणम् | चरकसंहिता | सुश्रुतसंहिता |
| अष्टाङ्गहृदयम् | शार्ङ्गधरसंहिता | भावप्रकाशः | |

आ. एतानि पदानि पाठे कुत्र सन्तीति दृष्ट्वा '........' इति चिह्नेन अङ्कयन्तु।

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. आयुर्वेदस्य कति अङ्गानि?

२. आयुः इत्युक्ते किम्?

३. मूर्धन्यस्थाने स्थितं ग्रन्थद्वयं किम्?

४. केषाञ्चन आयुर्वेदग्रन्थानां नामानि लिखन्तु?



आ. चिन्तयन्तु, लिखन्तु

१. भवान् ज्वरपीडितः भवति चेत् किं करोति इति स्वीयवाक्यैः लिखतु।

२. प्राथमिकचिकित्साविषये भवान् किं जानाति?

३. पाठस्य विषये स्वाभिप्रायं लिखतु।

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. कोष्ठके कानिचन पदानि दत्तानि। तानि उपयुज्य अधः मञ्जूषायाम् अन्त्याक्षरीक्रीडां क्रीडन्तः पदरचनां कुर्वन्तु।

| | | | | |
|---|---|---|---|---|
| माधवनिदानम् | तुलसीदलम् | नासिका | नागरिकः | चरकसंहिता |
| लशुनम् | कायचिकित्सा | कौमारभृत्यम् | शालाक्यः | दिनचर्या |
| रोगनिवारणम् | आयुर्वेदः | नियमाचरणम् | | |

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| च | | | | | ता | ❁ | | | | | लम् |
| ❁ | | | नम् | ❁ | | | का | ❁ | | | |
| | त्सा | ❁ | शा | | क्यः | ❁ | कौ | | | | त्यम् |
| ❁ | आ | | | दः | ❁ | | | | र्या | ❁ | रो |
| | | | | णम् | ❁ | नि | | | | | णम् |
| ❁ | मा | | | | | नम् | ❁ | | | | कः |

आ. कोष्ठकस्थानि नामानि शरीराङ्गैः सह रेखया मेलयन्तु।

| | |
|---|---|
| शिरः | ललाटः |
| केशाः | नासिका |
| कर्णौ | ओष्ठौ |
| मुखम् | जिह्वा |
| नेत्रम् | दन्ताः |
| कपोलः | चिबुकम् |
| हस्तः | अङ्गुली |
| नखाः | पादः |
| उदरम् | हृदयम् |



इ. कोष्ठकस्थानि पदानि अधः दत्तस्य सम्बद्धपदस्य पुरतः लिखन्तु।

| | | | | |
|---|---|---|---|---|
| अन्धता | खञ्जता | हृद्रोगाः | शिरोवेदना | लालाजलम् |
| बधिरता | अल्सर् | मूत्ररोगाः | कासः | |

१. हृदयम् ............. २. पादः ............. ३. नेत्रम् .............

४. कर्णः ............. ५. उदरम् ............. ६. शिरः .............

७. मूत्रकोशः ............. ८. कण्ठः ............. ९. जिह्वा .............


SCERT TELANGANA

इ. अधः केचन शब्दाः दत्ताः सन्ति। तेषां सम्बद्धशब्दान् ऊहित्वा लिखन्तु।




उदा - वैद्यशाला ....................

.................... ....................

.................... ....................

.................... ....................

.................... ....................




उदा - चरकसंहिता ....................

.................... ....................

.................... ....................

.................... ....................

.................... ....................

## ५. व्याकरणांशाः



अ. अत्र आवरणेषु कानिचन पदानि दत्तानि सन्ति। तेषां लृट्लकार - (भविष्यत्काल) रूपाणि रिक्तस्थानेषु लिखन्तु।



माता एवं चिन्तयति।

मासत्रयानन्तरं मम पुत्रः जनिष्यते (जनि)। मन्दं मन्दं .................... (चल्)। विद्यालयं .................. (गम्), सम्यक् ......................(पठ्)। आयुर्वेदस्नातकः ................ (भव्)। वैद्यः ................ (भव्)। वैद्यसेवां ................ (कर्)। पुरस्कारं कीर्तिं च ............... ( अर्ज )।

SCERT TELANGANA

आ. अधः दत्तानि विभिन्नधातूनां भविष्यत्कालस्य प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| भविष्यत्काले - | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषे | भविष्यति | भविष्यतः | भविष्यन्ति |
| | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| | नेष्यति | नेष्यतः | नेष्यन्ति |
| | करिष्यति | करिष्यतः | करिष्यन्ति |
| | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| | पास्यति | पास्यतः | पास्यन्ति |
| | खादिष्यति | खादिष्यतः | खादिष्यन्ति |
| | दास्यति | दास्यतः | दास्यन्ति |
| | क्रेष्यति | क्रेष्यतः | क्रेष्यन्ति |

इ. उदाहरणं दृष्ट्वा अधः दत्तानि वर्तमानकालस्य क्रियापदानि भविष्यत्काले परिवर्तयन्तु।

उदा - पठति - पठिष्यति

१. वदति - ................ ४. हसति - ................

२. क्रीडति - ................ ५. पतति - ................

३. चलति - ................ ६. निन्दति - ................

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. भवन्तः यदा रोगपीडिताः अभवन् तदा वैद्यं दृष्टवन्तः स्युरेव। तदा वैद्येन सह किं किं चर्चितवन्तः इति संवादरूपेण लिखन्तु।

## ७. परियोजनाकार्यम्



अ. चित्रं दृष्ट्वा तत्तत् वस्तु प्राथमिकचिकित्सायां कथम् उपयुज्यते इति (ग्रन्थालयस्य / दूरदर्शनस्य साहाय्येन) एकं वाक्यं मातृभाषया लिखन्तु।



आर्द्रकम्



लशुनम्



मधु

SCERT TELANGANA


हरिद्रा


सुधा


जीरकम्


निम्बम्


तुलसी


कृष्णमरीचः

**आ. पञ्च आयुर्वेदग्रन्थानां तेषां लेखकानां च नामानि भित्तिपत्रे लिखित्वा आनयन्तु।**

## ८. प्रशंसा



क्रीडाङ्गणे सर्वे क्रीडन्तः भवन्ति। अकस्मात् सरिता अधः पतति। तस्याः पादे व्रणः भवति। मालती धावित्वा देवमन्दिरतः किमपि आनयति लेपयति च।

शिक्षिका - मालति ! किं लेपयति?

मालती - मधु-तिलतैलं च मेलयित्वा लेपयामि।

शिक्षिका - तेन किं प्रयोजनम् ?

मालती - द्वयं मिलित्वा ''अयोडिन्'' इव कार्यं करोति। व्रणः शीघ्रम् उपशमितः भवति।

शिक्षिका - उत्तमः उपायः। भवती एतत् कथं जानाति?

मालती - गतसप्ताहे एवमेव मम पादे अभवत्। मम मातामही इत्थमेव कृतवती। पश्यतु मम व्रणः न दृश्यते एव। (इति स्वपादं दर्शयति)

(सर्वे मालतीं प्रशंसन्ति)

(तथैव भवतः गृहे स्थितानाम् औषधमयवस्तूनां नामानि वदतु ।)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. आयुर्वेदस्य वैशिष्ट्यं वक्तुं शक्नोमि । | | | |
| ३. पाठस्य विषये स्वाभिप्रायं लेखितुं शक्नोमि । | | | |
| ४. वैद्यरोगिसम्भाषणं लेखितुं शक्नोमि । | | | |

SCERT TELANGANA